Roll No……………………….
Signature of Invigilator ………

Paper Code

BV-104

# पतंजलि विश्वविद्यालय

## University of Patanjali
## Examination March-2021

### बी. ए. व्याकरण, प्रथमसत्रम्
### व्याकरणम्, चतुर्थपत्रम्
### वैदिकसाहित्यम्

समयः - होरात्रयम् पूर्णाङ्काः ७०

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

## (खण्ड -क)

प्र01. स्मृताः केचन पञ्च सूक्तमन्त्रा लेखनीयाः। ( 1 x5 =5)
पाठ्यक्रम निर्धारिताः केचन पञ्चमन्त्राः लेखनीयाः।

प्र02. पृष्टेषु पञ्चसु चतुर्णां समाधानं कुरु। ( 2.5 x4 =10)

1. द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयन्ते।
   यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः सजनास इन्द्रः।।
2. ऋचांत्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्वरीषु।
   ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मितीत उत्वः।।
3. यो जात एवं प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत्।
   यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना सजनास इन्द्रः।।
4. उतत्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्नशृणोत्येनाम्।
   उतोत्वस्मै तन्वं विसस्र जायेव पत्य उशती सुवासोः।।
5. सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
   अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि।।

## (खण्ड -ख)

प्र01. पृष्टयोः द्वयोः एकस्य समाधानं कुरु। (सूत्रादग्रे पञ्च सूत्राणि) ( 5 x1 =5)

1. तस्य वाचकः प्रणवः।
2. हेयं दुःखमनागतम्।।

प्र02. पृष्टेषु सप्तसु सूत्रेषु पञ्चानां सूत्राणामर्था बोधनीयाः। ( 1 x5 =5)

1. वीतराग विषयं वा चित्तम्।
2. तत्र निरतिशयं सर्वज्ञबीजम्।
3. वितर्कबाधने प्रतिपक्षभावनम्।
4. ब्रह्मचर्य प्रतिष्ठायां वीर्यलाभः।
5. अभ्यासवैराग्याभ्यां तन्निरोधः।
6. ते प्रतिप्रसवहेयाः सूक्ष्माः।
7. ततो द्वन्द्वानभिघातः।

प्र03. पृष्टेषु त्रिषु द्वयोः विषयात्मकप्रश्नयोः समाधानं कुरु। ( 5 x2 =10)

1. योगदर्शने ईश्वरस्य स्वरूपं किं सूत्रसहितं ज्ञापयन्तु।
2. क्रियायोगस्य का महिमा? लिख्यताम्।
3. अष्टाङ्गयोग विषये स्वधिया किञ्चित् लिख्यताम्।

## ( खण्ड -ग)

प्र01. पृष्टानां पञ्चानां मन्त्राणां पूर्तिः करणीया। ( 1 x5 =5)

1. अनेजदेकं ...........................................।।
2. स पर्य्यगाच्छुक्रम्. ..........................।।
3. पूषन्नेकर्षे. ...........................................।।
4. अग्नेनय. ............................................।।
5. ......................................... विजुगुप्सते।।

प्र02. पृष्टेषु चतुर्षु द्वयोः विषयात्मकप्रश्नयोः समाधानं कुरु। ( 5 x2 =10)

1. ईशोपनिषदानुसारम् ईश्वरस्य स्वरूपस्य वर्णनं क्रियताम्।
2. ‘‘विद्यां च अविद्यां च’’ अस्यमंन्त्रस्य व्याख्या कार्या।
3. तेन त्यक्तेनभुञ्जीथाअस्य अभिपायं स्वशब्दैः लिख्यताम्।
4. ‘‘हिरण्यमयेन पात्रेण’’ अस्य मंन्त्रस्य व्याख्या लेखनीया।

## ( खण्ड -घ)

प्र01. पृष्टेषु पञ्चानां श्लोकानां पूर्तिः करणीया। ( 2 x5 =10)

1. नहिं कश्चित्. ..............................................................||
2. यज्ञार्थात्कर्मणोऽन्यत्र. ..................................................||
3. यद्यदाचरति श्रेष्ठः ......................................................||
4. मयिसर्वाणि कर्माणि ...................................................||
5. श्रेयान्स्वधर्मोविगुणः ..................................................||

प्र02. पृष्टानां पञ्चानां श्लोकानां पदच्छेदविभक्तिसमासा लेखनीयाः। ( 2 x5 =10)

1. धूमेनाव्रियते वह्निर्यथादर्शो मलेन च।
   यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्॥

2. तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।
   पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्॥

3. व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे।
   तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्॥

4. यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन।
   कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते॥

5. न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।
   न च सन्यसनादेव सिद्धिं समधिगच्छति॥

--------------x--------------